*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[12]**

1. प्रदेशेऽस्मिन् केषां बाहुल्यं वर्तते?

(A) कर्गदोद्योगानां (B) प्रस्तराणां (C) तण्डुलानां (D) हस्तशिल्पानां

**उत्तर :** (D) हस्तशिल्पानां

2. अस्माकं देशे कति केन्द्रशासितप्रदेशाः सन्ति?

(A) पञ्च (B) नव (C) अष्ट (D) द्वादश

**उत्तर :** (C) अष्ट

3. कः प्रयोगो प्रतीकात्मको वर्तते?

(A) सप्तर्षयः (B) सप्तभगिन्यः (C) नवग्रहाः (D) अष्टभ्रातारः

**उत्तर :** (B) सप्तभगिन्यः

4. पाठानुसारं लघुः भ्राता कः वर्तते?

(A) असमः (B) मिजोरमः (C) मेघालयः (D) सिक्किमः

**उत्तर :** (D) सिक्किमः

5. भगिनीप्रदेशे केषां प्राचुर्यं विद्यते?

(A) निम्बवृक्षाणाम् (B) वंशवृक्षाणाम् (C) आम्रवृक्षाणाम् (D) तालवृक्षाणाम्

**उत्तर :** (B) वंशवृक्षाणाम्

6. भ्रातृ-भगिनीप्रदेशोऽयं कस्मै समीचीनः?

(A) धनार्जनाय (B) स्नानाय (C) भ्रमणाय (D) दर्शनाय

**उत्तर :** (C) भ्रमणाय

7. 'यदस्माकं देशे अष्टाविंशतिः राज्यानि सन्ति' - इत्यत्र विशेषणं किम्?

(A) अष्टाविंशतिः (B) देशे (C) अस्माकं (D) राज्यानि

**उत्तर:** (A) अष्टाविंशतिः

8. साम्प्रतं कः उद्योगः अन्ताराष्ट्रियख्यातिम् अवाप्तोऽस्ति?

(A) वंशोद्योगः (B) वस्त्रोद्योगः (C) कर्गदोद्योगः (D) मत्स्योद्योगः

**उत्तर:** (A) वंशोद्योगः

9. "पश्यत कोणमैशान्यं भारतस्य मनोहरम्" इति पाठस्य क्रमः कः?

(A) सप्तमः (B) अष्टमः (C) पञ्चमः (D) नवमः

**उत्तर :** (B) अष्टमः

10. भगिनी प्रदेशोऽयं बह्वाकर्षकः ज्ञायते।

(A) अयं भगिनीप्रदेशः अत्यधिकम् आकर्षकं प्रतीयते।

(B) भगिन्याः प्रदेशः एषः बहुधा आकर्षकः नास्ति।

(C) अस्मिन् प्रदेशे आकर्षकाः भगिन्यः सन्ति।

**उत्तर:** (A) अयं भगिनीप्रदेशः अत्यधिकम् आकर्षकं प्रतीयते।

11. शरीरेण ऊर्जस्विनः एतत्प्रादेशिकाः।

(A) एतस्य प्रदेशस्य जनाः ऊर्जारहिताः सन्ति।

(B) अस्य प्रदेशस्य जनाः स्थूलशरीराः सन्ति।

(C) अस्य प्रदेशस्य जनाः शरीरेण ऊर्जावन्तः सन्ति।

**उत्तर :** (C) अस्य प्रदेशस्य जनाः शरीरेण ऊर्जावन्तः सन्ति।

12. सप्तभगिन्यः स्वीये प्राचीनतिहासे प्रायः कथं दृष्टाः?

(A) पराधीनाः (B) शुष्काः (C) निर्मलाः (D) स्वाधीनाः

**उत्तर :** (D) स्वाधीनाः

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा। [11]**

13. अस्माकं देशे ________ केन्द्रशासितप्रदेशाः सन्ति। (नव / अष्ट)

**उत्तर :** अष्ट

14. अस्माकं देशे ________ राज्यानि तथा अष्ट केन्द्रशासितप्रदेशाः सन्ति। (अष्टाविंशतिः / जनजातिः)

**उत्तर :** अष्टाविंशतिः

15. छात्राः अद्य ________ विषये ज्ञातुमिच्छन्ति। (स्वदेशस्य राज्यानां / पूर्वोत्तरराज्यानि)

**उत्तर :** स्वदेशस्य राज्यानां

16. तत्र तु वंशवृक्षाणां ________ अपि प्राप्यन्ते। (वने / वनानि)

**उत्तर :** वनानि

17. पूर्वोत्तरराज्येषु वंशवृक्षाणां ________ विद्यते। (प्राचयँ / जनजातिः)

**उत्तर :** प्राचुर्यम्

18. प्रदेशेऽस्मिन् ________ बाहुल्यम् अस्ति। (जनजातिः, प्राचयँ)

**उत्तर :** जनजातिः

19. भवती अपि ________ सार्द्धं चलतु। (अस्माभिः / अस्मान्)

**उत्तर :** अस्माभिः

20. रोचते ________ अयं विचारः। (मम / मह्यम्)

**उत्तर :** मह्यम्

21. वयं सर्वे स्वदेशस्य राज्यानां विषये ज्ञातुम्________। (इच्छामः / इच्छति)

**उत्तर :** इच्छामः

22. सप्तभगिन्यः एकः भ्राता च इति ________ कथ्यन्ते। (पूर्वोत्तरराज्यानि / सिक्किमः)

**उत्तर :** पूर्वोत्तरराज्यानि

23. ________ सह भगिनीसप्तके इमानि राज्यानि सन्ति। (भ्रात्रा / भ्रातृ)

**उत्तर :** भ्रात्रा

*** स्तम्भयोः मेलनं कुरुत।** **[8]**

| शब्दाः | अर्थाः |
|---|---|
| 24. समन्वायः | (क) स्वसा |
| 25. साम्याद् | (ख) समूहः |
| 26. भगिनी | (ग) प्रसिद्धः |
| 27. प्रथितः | (घ) समानतया |

**उत्तर :** (1 - ख, 2 - घ, 3 - क, 4 - ग)

| शब्दाः | अर्थाः |
|---|---|
| 28. स्वाधीनाः | (क) वेदितुम् |
| 29. सार्द्धम् | (ख) स्वतन्त्राः |
| 30. ज्ञातुम् | (ग) पारङ्गताः |
| 31. निष्णाताः | (घ) सह |

**उत्तर :** (1 - ख, 2 - घ, 3 - क, 4 - ग)

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत।** **[5]**

32. केषां समवायः 'सप्तभगिन्यः' इति कथ्यते?

**उत्तर :** सप्तराज्यानाम्

33. प्राचीनतिहासे काः स्वाधीनाः आसन्?

**उत्तर :** भात्रा सह सप्तभगिन्यः

34. सप्तभगिनी-प्रदेशे कः उद्योगः सर्वप्रमुखः?

**उत्तर :** वंशोद्योगः।

35. अस्माकं देशे कति केन्द्रशासितप्रदेशाः सन्ति?

**उत्तर :** अष्ट

36. अस्माकं देशे कति राज्यानि सन्ति?

**उत्तर :** अष्टाविंशतिः

*** पूर्णवाक्येन उत्तरं लिखत।** **[10]**

37. इमानि राज्यानि सप्तभगिन्यः इति किमर्थं कथ्यन्ते?

**उत्तर :** सामाजिक-सांस्कृतिक-परिदृश्यानां साम्याद् इमानि राज्यानि सप्तभगिन्यः इति कथ्यन्ते।

38. ऐशान्यकोणप्रदेशेषु के निवसन्ति?

**उत्तर :** ऐशान्यकोणप्रदेशेषु गारो-खासी-नागा-मिजो-लेप्वा-प्रभृतयः जनजातीयाः निवसन्ति।

39. भ्रातृसहित-भगिनीसप्तके कानि राज्यानि सन्ति?

**उत्तर :** भ्रातृसहित-भगिनीसप्तके इमानि राज्यानि सन्ति - 1. अरुणाचलप्रदेशः, 2. असमः, 3. मणिपुरम्, 4. मिजोरमः, 5. मेघालयः, 6. नागालैण्डः, 7. त्रिपुरा, 8. सिक्किमः।

40. पूर्वोत्तरप्रादेशिकाः केषु निष्णाताः सन्ति?

**उत्तर :** पूर्वोत्तरप्रादेशिकाः बहुभाषाभिः समन्विताः, पर्वपरम्पराभिः परिपूरिताः स्वलीलाकलासु च निष्णाताः सन्ति।

41. वंशवृक्षवस्तूनाम् उपयोगः कुत्र क्रियते?

**उत्तर :** वंशवृक्षवस्तूनाम् उपयोगः आवस्त्राभूषणेभ्यः गृहनिर्माणपर्यन्तं क्रियते।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत।** **[14]**

42. <u>सप्तभगिन्यः</u> प्राचीनतिहासे प्रायः स्वाधीनाः एव दृष्टाः।

**उत्तर : काः** प्राचीनतिहासे प्रायः स्वाधीनाः एव दृष्टाः?

43. अत्र <u>वंशवृक्षाणां</u> प्राचुर्यं विद्यते।

**उत्तर :** अत्र **केषां** प्राचुर्यं विद्यते?

44. अस्माकं देशे <u>अष्टाविंशतिः</u> राज्यानि सन्ति।

**उत्तर :** अस्माकं देशे **कति** राज्यानि सन्ति?

45. एतानि राज्यानि तु भ्रमणार्थं <u>स्वर्गसदृशानि</u>।

**उत्तर :** एतानि राज्यानि तु भ्रमणार्थं कीदृशानि?

46. तव <u>भगिनी</u> सम्यग्जानाति।

**उत्तर :** तव **का** सम्यग्जानाति?

47. प्रदेशेऽस्मिन् <u>हस्तशिल्पानां</u> बाहुल्यं वर्तते?

**उत्तर :** प्रदेशेऽस्मिन् **केषां** बाहुल्यं वर्तते?

48. प्रदेशेऽस्मिन् <u>हस्तशिल्पानां</u> बाहुल्यं वर्तते।

**उत्तर :** प्रदेशेऽस्मिन् **केषां** बाहुल्यं वर्तते?

49. भगिनीप्रदेशोऽयं <u>बह्वाकर्षकः</u> ज्ञायते।

**उत्तर :** भगिनीप्रदेशोऽयं **कीदृशः** ज्ञायते?

50. वयं <u>स्वदेशस्य</u> राज्यानां विषये ज्ञातुमिच्छामः?

**उत्तर :** वयं **कस्य** राज्यानां विषये ज्ञातुमिच्छामः?

51. वयं स्वदेशस्य <u>राज्यानां</u> विषये ज्ञातुमिच्छामः।

**उत्तर :** वयं स्वदेशस्य **केषां** विषये ज्ञातुमिच्छामः?

52. सप्तराज्यसमूहः <u>भगिनीसप्तकं</u> मतम् ।

**उत्तर :** सप्तराज्यासमूहः **किम्** मतम्?

53. <u>क्षेत्रपरिमाणैः</u> इमानि लघूनि वर्तन्ते।

**उत्तर : कैः** इमानि लघूनि वर्तन्ते?

54. एतासां भगिनीनां संस्कृतिः <u>महत्त्वाधायिनी</u> वर्तते।

**उत्तर :** एतासां भगिनीनां संस्कृतिः **कीदृशी** वर्तते?

55. सप्तभगिन्यः <u>प्राचीनेतिहासे</u> प्रायः स्वाधीनाः एव दृष्टाः।

**उत्तर :** सप्तभगिन्यः **कदा** प्रायः स्वाधीनाः एव दृष्टाः?

*** अधोलिखितशब्दानाम् अर्थान् विलिख्य वाक्येषु प्रयोगं कुरुत।** **[8]**

56. प्रतीकात्मकः - ____________

**उत्तर :** प्रतीकात्मकः - सांकेतिक।
वाक्य - अयं शब्दः प्रतीकात्मकः वर्तते।

57. प्रथितानि - ____________

**उत्तर :** प्रथितानि - प्रसिद्ध हैं।
वाक्य - इमानि नगराणि प्रथितानि सन्ति।

58. भगिनी - ____________

**उत्तर :** भगिनी - बहन।
वाक्य - गीता मम भगिनी अस्ति।

59. अद्य - ____________

**उत्तर :** अद्य - आज।
वाक्य - अद्य सोमवासरः अस्ति।

60. ज्ञातुम् - ____________

**उत्तर :** ज्ञातुम् - जानने के लिए।
वाक्य - बालकः तद्विषये ज्ञातुम् इच्छति।

61. मनसि - ____________

**उत्तर :** मनसि - मन में।
वाक्य - मम मनसि तं प्रति स्नेहं वर्तते।

62. लघूनि - ____________

**उत्तर :** लघूनि - छोटे।
वाक्य - तानि लघूनि राज्यानि सन्ति।

63. वंशवृक्षाः - ____________

**उत्तर :** वंशवृक्षाः - बाँस के वृक्ष।
वाक्य - अस्मिन् प्रदेशे वंशवृक्षाः सन्ति।

*** अधोलिखित गद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[63]**

64. अध्यापिका - सुप्रभातं छात्राः।
छात्राः - सुप्रभातम् आचार्ये।
अध्यापिका - शुभाशयाः। अद्य किं पठनीयम्?
छात्राः - वयं सर्वे स्वदेशस्य राज्यानां विषये ज्ञातुमिच्छामः।
अध्यापिका - शोभनम्। वदत, अस्माकं देशे कति राज्यानि सन्ति?
स्वरा - महोदये! मम भगिनी कथयति यत् अस्माकं देशे अष्टाविंशतिः राज्यानि सन्ति इति। एतद् अतिरिच्य

अष्टकेन्द्रशासितप्रदेशाः अपि सन्ति।

I. एकपदेन उत्तरत -

(i) अद्य किं पठनीयम्"- इति का पृच्छति?

(ii) अस्माकं देशे कति राज्यानि सन्ति?

II. पूर्णवाक्येन उत्तरत -

(i) सर्वे छात्राः किं ज्ञातुम् इच्छन्ति?

(ii) अस्माकं देशे कति केन्द्रशासितप्रदेशाः सन्ति?

III. निर्देशानुसारम् उत्तरत -

(i) 'इच्छामः' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(अ) ते (ब) स्वरा (स) वयम् (द) अध्यापिका

(ii) 'श्वः' इति पदस्य नाट्यांशे विलोमपदं किम्?

(अ) अद्य (ब) ह्यः (स) सर्वे (द) कदा

(iii) 'अष्टाविंशतिः' इति विशेषणस्य विशेष्यपदं किम् अस्ति?

(अ) छात्राः (ब) प्रदेशाः (स) नगराणि (द) राज्यानि

**उत्तर :** I. (i) अध्यापिका।

(ii) अष्टाविंशतिः।

II. (i) सर्वे छात्राः स्वदेशस्य राज्यानां विषये ज्ञातुम् इच्छन्ति।

(ii) अस्माकं देशे अष्टकेन्द्रशासितप्रदेशाः सन्ति।

III. (i) (स) वयम्

(ii) (अ) अद्य

(iii) (द) राज्यानि

65. पर्वतैः नदीभिः च सुशोभितानि एतानि राज्यानि पूर्वहिमालय-श्रेणिषु पत्काई-नागपर्वत-प्रदेशे च स्थितानि। एतेषु बराक-ब्रह्मपुत्रादि-नद्यः प्रवहन्ति एवञ्च पर्वतश्रेण्यः, पीठस्थलानि, निम्नपर्वताः, उपत्यकाः च अस्मिन् भू-भागे भू-वैविध्यं धारयन्ति। प्राकृतिक सम्पदाभिः समृद्धः अयं प्रदेशः पूर्व-दक्षिणपूर्व-एशियायाः द्वारम् अस्ति। तानि राज्यानि अष्टभ्रातृभगिन्यः इति नाम्ना प्रसिद्धानि सन्ति। तानि एव 'अष्टभगिन्यः ' अथवा 'सप्तभगिन्यः एकः भ्राता च' इति कथ्यन्ते।

I. एकपदेन उत्तरत -

(i) अयं प्रदेशः कस्य द्वारम् अस्ति?

(ii) तानि अष्टराज्यानि केन नाम्ना प्रसिद्धानि सन्ति?

II. पूर्णवाक्येन उत्तरत -

(i) एतानि राज्यानि कैः सुशोभितानि सन्ति?

(ii) अस्मिन् भू-भागे के भू-वैविध्यं धारयन्ति?

III. निर्देशानुसारम् उत्तरत -

(i) 'नद्यः' इति कर्तृपदस्य क्रियापदं किम् अस्ति ?

(अ) धारयन्ति (ब) प्रवहन्ति (स) सन्ति (द) स्थितानि

(ii) 'भू-भागे' इति विशेष्यपदस्य विशेषणपदं किम् अस्ति ?

(अ) अयम् (ब) एतेषु (स) तानि (द) अस्मिन्

(iii) 'नदीभिः' इति पदे का विभक्तिः प्रयुक्ता?

(अ) तृतीया (ब) चतुर्थी (स) पञ्चमी (द) षष्ठी

**उत्तर :** I. (i) पूर्व-दक्षिणपूर्व-एशियाया।

(ii) 'अष्टभ्राताभगिन्यः' इति।

II. (i) एतानि राज्यानि पर्वतैः नदीभिः च सुशोभितानि सन्ति।
(ii) अस्मिन् भू-भागेः नद्यः, पर्वतश्रेण्यः, पीठस्थलानि, निम्नपर्वताः, उपत्यकाः च भू-वैविध्यं धारयन्ति।
III. (i) (ब) प्रवहन्ति
(ii) (द) अस्मिन्
(iii) (अ) तृतीया।

66. मालती - महोदये! तत्र तु वंशवृक्षाणां वनानि अपि प्राप्यन्ते?
अध्यापिका - आम्। प्रदेशेऽस्मिन् हस्तशिल्पानां बाहुल्यं वर्तते। आवस्त्राभूषणेभ्यः गृहनिर्माणपर्यन्तं प्रायः वंशवृक्षनिर्मितानां वस्तूनाम् उपयोगः क्रियते। यतो हि अत्र वंशवृक्षाणां प्राचुर्यं विद्यते। साम्प्रतं वंशोद्योगोऽयम्। अन्ताराष्ट्रियख्यातिम् अवाप्तोऽस्ति।
I. एकपदेन उत्तरत -
(i) प्रदेशेऽस्मिन् केषां बाहुल्यं वर्तते?
(ii) अत्र केषां वृक्षाणां प्राचुर्यं विद्यते?
II. पूर्णवाक्येन उत्तरत -
(i) कुत्र वंशवृक्षनिर्मितानां वस्तूनाम् उपयोगः क्रियते?
(ii) साम्प्रतं कः उद्योगः अन्ताराष्ट्रियख्यातिम् अवाप्तोऽस्ति?
III. निर्देशानुसारम् उत्तरत -
(i) 'प्राप्यन्ते' इति क्रियापदस्य नाट्यांशे कर्तृपदं किम् अस्ति?
(अ) राज्यानि (ब) वनानि (स) वृक्षाः (द) वस्त्राणि
(ii) 'प्रदेशे' इति विशेष्यपदस्य नाट्यांशे विशेषणपदं किम्?
(अ) अस्य (ब) तत्र (स) अत्र (द) अस्मिन्
(iii) 'वस्तूनाम्' इति पदे का विभक्तिः प्रयुक्ता?
(अ) षष्ठी (ब) सप्तमी (स) द्वितीया (द) पञ्चमी

**उत्तर :** I. (i) हस्तशिल्पानाम्।
(ii) वंशवृक्षाणाम्।
II. (i) आवस्त्राभूषणेभ्यः गृहनिर्माणपर्यन्तं प्रायः वंशवृक्षनिर्मितानां वस्तूनाम् उपयोगः क्रियते।
(ii) साम्प्रतं वंशोद्योगः अन्तरराष्ट्रियख्यातिम् अवाप्तोऽस्ति।
III. (i) (ब) वनानि
(ii) (द) अस्मिन्
(iii) (अ) षष्ठी

67. सर्वे छात्राः - अहो! अत्यन्तं सुखकरी वार्ता। श्रावयतु तावद् यत् कानि तानि राज्यानि इति?
अध्यापिका - अद्वयं मत्रयं चैव न-त्रि-युक्तं तथाद्वयम्।
सप्तराज्यसमूहोऽयं भगिनीसप्तकं मतम्॥
तेन युक्तो लघुः भ्राता सिक्किमः इति विश्रुतः।
पश्यत कोणमैशान्यं भारतस्य मनोहरम्॥
I. एकपदेन उत्तरत -
(i) का सुखकरी वर्तते?
(ii) लघुः भ्राता कः विश्रुतः?
II. पूर्णवाक्येन उत्तरत -
(i) सप्तराज्यसमूहः किं मन्यते?
(ii) भारतस्य कीदृशं कोणं पश्यत?
III. निर्देशानुसारम् उत्तरत -

(i) 'लघुः' इति विशेषणस्य विशेष्यपदं किम्?
(अ) भ्राता (ब) सिक्किमः (स) विश्रुतः (द) युक्तः
(ii) 'दुःखकरी' इति पदस्य नाट्यांशे विलोमपदं किम्?
(अ) मनोहरम् (ब) कोणम् (स) सुखकरी (द) विपन्नम्
(iii) 'तेन' इति पदे का विभक्तिः प्रयुक्ता?
(अ) तृतीया (ब) चतुर्थी (स) पञ्चमी (द) षष्ठी

**उत्तर :** I. (i) वार्ता।
(ii) सिक्किमः।
II. (i) सप्तराज्यसमूहः 'भगिनीसप्तकम्' मन्यते।
(ii) भारतस्य मनोहरम ऐशान्यं कोणं पश्यत।
III. (i) (अ) भ्राता
(ii) (स) सुखकरी
(iii) (अ) तृतीया

68. अभिनवः - भ्रातृ-भगिनीप्रदेशोऽयं बह्वाकर्षकः इति प्रतीयते।
मृदुलः - मान्ये! किं भ्रमणाय भ्रातृ-भगिनीप्रदेशोऽयं समीचीनः?
सर्वेछात्राः - (उच्चैः) महोदये! आगामिनि अवकाशे वयं तत्रैव गन्तुमिच्छामः।
स्वरा - आचार्ये! भवती अपि अस्माभिः सार्द्धं चलतु किल।
अध्यापिका – रोचते मेऽयं विचारः। एतानि राज्यानि तु भ्रमणार्थं स्वर्गसदृशानि सन्ति। अतः अवश्यं चलामः।
I. एकपदेन उत्तरत -
(i) भ्रातृ-भगिनीप्रदेशः कीदृशः प्रतीयते?
(ii) भ्रातृ-भगिनीप्रदेशः किमर्थं समीचीनः?
II. पूर्णवाक्येन उत्तरत -
(i) छात्राः आगामिनि अवकाशे कुत्र गन्तुम् इच्छन्ति?
(ii) एतानि राज्यानि भ्रमणार्थं कीदृशानि सन्ति?
III. निर्देशानुसारम् उत्तरत -
(i) 'चलतु' इति क्रियापदस्य नाट्यांशे कर्तृपदं किम् अस्ति?
(अ) भवती (ब) भगिनी (स) वयं (द) अयम्
(ii) 'गन्तुम्' इति पदे कः प्रत्ययः?
(अ) क्त्वा (ब) तमप् (स) तुमुन् (द) क्त
(iii) 'रोचते मेऽयं विचारः ' - अत्र 'मे' इति पदे का विभक्तिः?
(अ) तृतीया (ब) चतुर्थी (स) षष्ठी (द) सप्तमी

**उत्तर :** I. (i) बह्वाकर्षकः।
(ii) भ्रमणाय।
II. (i) छात्रा आगामिनि अवकाशे भ्रातृ-भगिनीप्रदेशे गन्तुम् इच्छन्ति।
(ii) एतानि राज्यानि भ्रमणार्थं स्वर्गसदृशानि सन्ति।
III. (i) (अ) भवती
(ii) (स) तुमुन्
(iii) (ब) चतुर्थी

69. अध्यापिका - शोभनं स्वरे! सम्यक् जानाति तव भगिनी। भवतु, अपि यूयं जानीथ यद् एतेषु राज्येषु अष्टराज्यानाम् एकः समवायोऽस्ति यः सप्तभगिन्यः एकः भ्राता च इति नाम्ना प्रथितः अस्ति।

सर्वे छात्राः - ( परस्परं साश्चर्यं पश्यन्तः) सप्तभगिन्यः एकः भ्राता च!

श्रीशः - इमानि राज्यानि सप्तभगिन्यः एकः भ्राता च इति किमर्थं कथ्यन्ते?

अध्यापिका - प्रयोगोऽयं प्रतीकात्मको वर्तते। कदाचित् सामाजिक-सांस्कृतिक-परिदृश्यानां साम्याद् भौगोलिकवैशिष्ट्यात् च इमानि उक्तोपाधिना प्रथितानि।

I. एकपदेन उत्तरत -

(i) कस्य भगिनी सम्यक् जानाति?

(ii) अयं प्रयोगः कीदृशः वर्तते?

II. पूर्णवाक्येन उत्तरत -

(i) एतेषु राज्येषु केषाम् एकः समवायोऽस्ति?

(ii) केषां साम्याद् अष्टराज्यानि 'सप्तभगिन्यः एक भ्राता' इति नाम्ना प्रथितानि?

III.निर्देशानुसारम् उत्तरत -

(i) 'जानाति' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(अ) यूयम् (ब) भगिनी (स) अध्यापिका (द) भ्राता

(ii) 'प्रसिद्धः' इत्यर्थे नाट्यांशे समानार्थकपदं किम् अस्ति?

(अ) शोभनम् (ब) साम्याद् (स) विशिष्टः (द) प्रथितः

(iii) 'नाम्ना' इति पदे का विभक्तिः प्रयुक्ता?

(अ) तृतीया (ब) चतुर्थी (स) द्वितीया (द) षष्ठी

**उत्तर :** I. (i) स्वरायाः।

(ii) प्रतीकात्मकः।

II. (i) एतेषु राज्येषु अष्टराज्यानाम् एकः समवायोऽस्ति।

(ii) सामाजिक-सांस्कृतिक-परिदृश्यानां साम्याद् अष्टराज्यानि 'सप्तभगिन्यः एकः भ्राता' इति नाम्ना प्रथितानि।

III. (i) (ब) भगिनी

(ii) (द) प्रथितः

(iii) (अ) तृतीया

70. अरुणाचलप्रदेशः, असमः, मणिपुरं, मेघालयः, मिजोरमः, नागालैण्डं, त्रिपुरा एवञ्च सिक्किमः इत्येतानि अष्टराज्यानि देशस्य पूर्वोत्तरभागे स्थितानि। एतानि राज्यानि भारतस्य केवलं स्थानविशेषत्वेन न, अपितु सांस्कृतिक-ऐतिहासिक विविधतायाः कारणेन विशेषमहत्त्वं वहन्ति। एषां प्रदेशानां प्राकृतिकं सौन्दर्यं, समुदायानां विविधता, भौगोलिक पर्यावरणीयं वैचित्र्यं च देशस्य अन्येभ्यः भागेभ्यः पृथक् अस्ति।

I. एकपदेन उत्तरत -

(i) अष्टराज्यानि देशस्य कस्मिन् भागे स्थितानि?

(ii) एषां प्रदेशानां वैचित्र्यं देशस्य अन्येभ्यः भागेभ्यः कीदृशम् अस्ति?

II. पूर्णवाक्येन उत्तरत -

(i) एतानि राज्यानि केन कारणेन विशेषमहत्त्वं वहन्ति?

(ii) देशस्य पूर्वोत्तरभागे स्थितानि कति राज्यानि सन्ति?

III. निर्देशानुसारम् उत्तरत -

(i) 'एतानि' इति विशेषणस्य विशेष्यपदं किम् अस्ति?

(अ) राज्यानि (ब) इत्येतानि (स) स्थितानि (द) कारणानि

(ii) 'वहन्ति' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(अ) महत्त्वं (ब) विविधतायाः (स) भारतस्य (द) राज्यानि

(iii) 'प्रदेशानाम्' इति संज्ञापदस्य गद्यांशे सर्वनामपदं किम् अस्ति ?

(अ) एतानि (ब) एषां (स) केषाम् (द) अन्येषां

**उत्तर :** I. (i) पूर्वोत्तरभागे।

(ii) पृथक्।

II. (i) एतानि राज्यानि सांस्कृतिक-ऐतिहासिक-विविधतायाः कारणेन विशेषमहत्त्वं वहन्ति।

(ii) देशस्य पूर्वोत्तरभागे स्थितानि अष्टराज्यानि सन्ति।

III. (i) (अ) राज्यानि

(ii) (द) राज्यानि

(iii) (ब) एषां।

71. इत्थं भ्रात्रा सिक्किमेन सह भगिनीसप्तके इमानि राज्यानि सन्ति - अरुणाचलप्रदेशः, असमः, मणिपुरम्, मिजोरमः, मेघालयः, नागालैण्डं, त्रिपुरा चेति। यद्यपि क्षेत्रपरिमाणैः इमानि लघूनि वर्तन्ते तथापि गुणगौरवदृष्ट्या बृहत्तराणि प्रतीयन्ते।

सर्वे छात्राः - कथं मान्ये!

अध्यापिका – भ्रात्रा सह इमाः सप्तभगिन्यः स्वीये प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः। न केनापि शासकेन इमाः स्वायत्तीकृताः। विविध-संस्कृतिविशिष्टायां भारतभूमौ एतासां भ्रातृ-भगिनीनां संस्कृतिः महत्त्वाधायिनी वर्तते।

I. एकपदेन उत्तरत -

(i) कैः इमानि राज्यानि लघूनि वर्तन्ते?

(ii) गुणगौरवदृष्ट्या इमानि कीदृशानि प्रतीयन्ते?

II. पूर्णवाक्येन उत्तरत -

(i) काः स्वीये प्राचीनेतिहासे स्वाधीनाः एव दृष्टाः?

(ii) कासां संस्कृतिः महत्त्वाधायिनी वर्तते?

III. निर्देशानुसारम् उत्तरत -

(i) 'वर्तते' इति क्रियापदस्य नाट्यांशे कर्तृपदं किम्?

(अ) राज्यानि (ब) संस्कृतिः (स) भ्राता (द) भगिनी

(ii) 'सप्तभगिन्यः' इति संज्ञापदस्य नाट्यांशे सर्वनामपदं किम्?

(अ) इमानि (ब) एते (स) एतासां (द) इमाः

(iii) 'बृहत्तराणि' इति पदस्य नाट्यांशे विलोमपदं किम्?

(अ) लघूनि (ब) परिमाणैः (स) राज्यानि (द) अल्पानि

**उत्तर :** I. (i) क्षेत्रपरिमाणैः।

(ii) बृहत्तराणि।

II. (i) भ्रात्रा सह इमाः सप्तभगिन्यः स्वीये प्राचीनेतिहासे।

(ii) एतासां भ्रातृ-भगिनीनां संस्कृतिः महत्त्वाधायिनी वर्तते।

III. (i) (ब) संस्कृतिः

(ii) (द) इमाः

(iii) (अ) लघूनि।

72. स्वरा - अन्यत् किमपि वैशिष्ट्यमस्ति एतासाम्?

अध्यापिका - नूनम् अस्ति एव। पर्वत-वृक्ष-पुष्प-प्रभृतिभिः प्राकृतिकसम्पद्भिः सुसमृद्धानि सन्ति इमानि राज्यानि। भारतवृक्षे पुष्प-स्तबकसदृशानि विराजन्ते एतानि। अस्ति तावदेतेषां विषये किञ्चिद् वैशिष्ट्यमपि कथनीयम्। सावहितमनसा श्रृणुत। जनजातिबहुलप्रदेशोऽयम्। गारो-खासी-नागा-मिजो लेप्चा-प्रभृतयः बहवः जनजातीयाः अत्र निवसन्ति। शरीरेण ऊर्जस्विनः एतत्प्रादेशिकाः बहुभाषाभिः समन्विताः, पर्वपरम्पराभिः परिपूरिताः, स्वलीला-कलासु च निष्णाताः सन्ति।

I. एकपदेन उत्तरत -

(i) जनजातीयाः शरीरेण कीदृशाः सन्ति?

(ii) अयं प्रदेशः कीदृशः अस्ति?

II. पूर्णवाक्येन उत्तरत -

(i) इमानि राज्यानि भारतवृक्षे कथं विराजन्ते?

(ii) जनजातीयाः कासु निष्णाताः सन्ति?

III. निर्देशानुसारम् उत्तरत -

(i) 'विराजन्ते' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(अ) इमानि (ब) पुष्पाणि (स) एतानि (द) जनजातीयाः

(ii) 'बहवः' इति विशेषणस्य नाट्यांशे विशेष्यपदं किम् अस्ति?

(अ) जनजातीयाः (ब) प्रादेशिकाः (स) प्रभृतयः (द) जनाः

(iii) 'परिपूर्णाः' इत्यर्थे नाट्यांशे किं पदं प्रयुक्तम्?

(अ) समन्विताः (ब) निष्णाताः (स) प्रादेशिकाः (द) परिपूरिताः

**उत्तर :** I. (i) ऊर्जस्विनः।

(ii) जनजातिबहुलः।

II. (i) इमानि राज्यानि भारतवृक्षे पुष्प-स्तबकसदृशानि विराजन्ते।

(ii) जनजातीयाः स्वलीला-कलासु निष्णाताः सन्ति।

III. (i) (स) एतानि

(ii) (अ) जनजातीयाः

(iii) (द) परिपूरिताः

----- -----